श्रीकृष्णनामाष्टकम्

निखिलश्रुतिमौलिरत्नमाला
द्युतिनीराजितपादपङ्कजान्त ।
अयि मुक्तकुलैरुपास्यमानं
परितस्त्वां हरिनाम संश्रयामि ॥१ ॥

जय नामधेय मुनिवृन्दगेय हे
जनरञ्जनाय परमाक्षराकृते ।
त्वमनादरादपि मनागुदीरितं
निखिलोग्रतापपटलीं विलुम्पसि ॥२ ॥

यदाभासोप्युद्यन्कवलितभवध्वान्तविभवो
दृशं तत्त्वान्धानामपि दिशति भक्तिप्रणयिनीम् ।
जनस्तस्योदात्तं जगति भगवन्नामतरणे
कृती ते निर्वक्तुं क इह महिमानं प्रभवति ॥३ ॥

यद्ब्रह्मसाक्षात्कृतिनिष्ठयापि
विनाशमायाति विना न भोगैः ।
अपैति नाम स्फुरणेन तत्ते
प्रारब्धकर्मेति विरौति वेदः ॥४ ॥

अघदमनयशोदानन्दनौ नन्दसूनो
कमलनयनगोपीचन्द्रवृन्दावनेन्द्राः ।
प्रणतकरुणकृष्णावित्यनेकस्वरूपे
त्वयि मम रतिरुच्चैर्वर्धतां नामधेय ॥५ ॥

वाच्यो वाचकमित्युदेति भवतो नाम स्वरूपद्वयं
पूर्वस्मात्परमेव हन्त करुणा तत्रापि जानीमहे
यस्तस्मिन्विहितापराधनिवहः प्राणी समन्ताद्भवेद्
आस्येनेदमुपास्य सोपि हि सदानन्दाम्बुधौ मज्जति ॥६ ॥

सूदिताश्रितजनार्तिराशये
रम्यचिद्घनसुखस्वरूपिणे ।
नाम गोकुलमहोत्सवाय ते
कृष्णपूर्णवपुषे नमो नमः ॥७ ॥

नारदवीणोज्जीवनसुधोर्मिनिर्यासमाधुरीपूर ।
त्वं कृष्णनाम कामं स्फुर मे रसने रसेन सदा ॥८ ॥

इति श्रीरूपगोस्वामिकृतस्तवमालायां श्रीनामाष्टकं सम्पूर्णम्